श्रीगणेशाय नमः॥ श्रीपाणिनिपतञ्जलिकात्यायनेभ्यो नमः॥ श्रीविश्वेश्वराय नमः॥ सर्वाकारं निराकारं विश्वाध्यक्षमतीन्द्रियम्॥ सदसद्रूपतातीतमद्वयं समुपास्महे॥१॥ ज्ञानलोचनसंलक्ष्यं नारायणमजं विभुम्॥ प्रणम्य परमात्मानं सर्वविद्याविधायिनम्॥२॥ पुरुषाः प्रतिपद्यन्ते देवत्वं यदनुग्रहात्॥ सरस्वतीं च तां नत्वा सर्वविद्याधिदेवताम्॥३॥ अपारवाक्प्रमाणानां पारं प्राप्तस्य धीमतः॥ गुरोर्महेश्वरस्यापि कृत्वा चरणवन्दनम्॥४॥ महाभाष्यार्णवावारपारीणं विवृतिप्लवम्॥ यथागमं विधास्येऽहं कैयटो जैयटात्मजः॥५॥ भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्ततः॥ छात्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम्॥६॥

श्रीगणेशाय नमः॥ योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन॥ योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥१॥ अथ शब्दानुशासनम्॥ अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते॥

तथापि हरिबद्धेन सारेण ग्रन्थसेतुना॥ क्रममाणः शनैः पारं तस्य प्राप्तोऽस्मि पङ्गुवत्॥७॥ भाष्यकारो विवरीकारणा आकरणस्य साक्षात्प्रयोजनमाह॥ अथ शब्दानुशासनमिति प्रयोजनप्रयोजनानि तु रक्षोहादीनि पश्चाद्वक्ष्यन्ते॥ सव्याख्यं व्याख्यातुं तस्य पदमथशब्दं तावद्व्याचष्टे॥ अथेत्ययमिति॥ इतिशब्दोऽथशब्दस्य स्वरूपपरस्थापनाय प्रयुक्तः॥ एवं हि परान्तरैः सामानाधिकरण्येन संबन्धो भवति अथशब्दो व्याख्यायते॥ स्वरूपे वास्य तत्त्व सर्वनाम्ना परामृश्यते। अयमिति ... अधिकारार्थ इति अधिकारः प्रस्तावो योऽनन्तरस्य प्रयोजनमित्यर्थः॥ निपातानां च द्योतकत्वं वाक्यपदीये निर्णीतम्॥ श्रीसरस्वत्यै नमः॥ श्रीगुरुभ्यो नमः॥॥

भा॰टी॰

नेत्याहेति॥ इङ्गितमाकृतिलाङ्गूलं शब्द इति प्रतीतं अपि तु द्रव्यमिति॥ यदि हि द्रव्यानुशासनं विवक्षितं भविष्यत् अपद्रव्यानुशासनमिति
वावक्ष्यत्। अनेनैवान्यापि न गुणक्रियासामान्यानां निराकृतिः शब्देऽपि प्रपञ्चार्थं तद्बोधपूर्वकं निराकरोति। यत्तर्हीति गोशब्दार्थे येषां सं
भेधा कक्कुद्माधांसले।१। परिहारस्तु पूर्ववत्। तत्रेङ्गितमभिप्रायस्य सूचकः शारीरव्यापारः चेष्टितं कायपरिस्पन्दः॥ निमिषितम्। भ्रूसंभा
पारः॥ शुक्लो नील इति॥ द्रव्यस्य प्रागुपन्यासात् गुणमात्राभिधायिनोऽत्र शुक्लादिशब्दाः॥ भिन्नेष्वभिन्नमिति॥ अनेन सामा
न्यस्यैकत्वं कथ्यते॥ छिन्नेष्वच्छिन्नमिति॥ अनेन नु नित्यत्वं सामान्यभूतमिति सत्ताख्यं महासामान्यं गोत्वादेः॥ सामान्यविशेषस्यो

२

॥२॥ नेत्याह। द्रव्यं नाम तत्। यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति स शब्दः। नेत्याह क्रिया नाम सा॥ यत्तर्हि शुक्लो
नीलः कपिलः कपोत इति स शब्दः नेत्याह गुणो नाम सः॥ यत्तर्हि भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं॥ सामान्य
भूतं स शब्दः॥ नेह आकृतिर्नाम सा कस्तर्हि शब्दः॥ येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सं ॥२॥
प्रत्ययो भवति स शब्दः॥

पमानं निर्दिष्टं॥ सामान्यमिव॥ सामान्यभूतं भूतशब्द उपमार्थः यथा पितृभूत इति तं द्रव्यादिष्वनिरस्तेषु पृच्छति॥ कस्त
उत्तरमाह। येनोच्चारितेनेति। वैयाकरणाः वर्णव्यतिरिक्तस्य पदस्फोटस्यैव वाचकत्वमिच्छन्ति॥ वर्णानां प्रत्येकं वा
चकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसंगात्॥ आनर्थक्ये तु प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावादभिव्यक्तिपक्षे नेति
मेणैवाभिव्यक्तेः समुदायाभावादेकस्मृत्युपारूढानां च वाचकत्वे सरो रस इत्यादावर्थप्रतीत्यविशेषप्रसंगात्तद्व्यतिरिक्तो स्फोट
ऽनादाभिव्यङ्ग्यो वाचको विस्तरेणाग्रे पदीपे व्यवस्थापितः॥ उच्चारितेन प्रकाशितेनेत्यर्थः॥ त्वभो
न
प्रत्ययः

मार

अथ शब्दस्याधिकारार्थत्वेपि वाक्यार्थः संपद्यतेऽनेनेति दर्शयति ॥ शब्दानुशासनमिति ॥ अनेकविद्याविषयस्यापि शब्दानुशासनस्य-
ना अथशब्दसंनिधानेन प्रतीयते ॥ व्याकरणस्य चेदमन्वर्थं नामशब्दानुशासनमिति ॥ अत्राचार्यस्य कर्त्तुः प्रयोजनाभावादनुपाद॰
यप्रयोगाभावात् ॥ नोभयप्राप्तौ कर्मणीति समनेन षष्ठी अपितु कर्त्तृकर्मणोः कृतीत्यनेनेति कर्मणि चेति समासप्रतिषेधाप्रसंगादि समप्र
दिवत्समासः शब्दशब्दस्य सामान्यशब्दस्य सामान्यशब्दत्वाद्धि नाप्रकरणादिना विशेषे वस्थानाभावात्त्वत्रौ शब्द काकवासितादीन
शासनप्रसंग इति मत्वाप्यवच्छिनत्ति केषामिति ॥ उत्तरपदार्थान्तर्गतस्यापि पूर्वपदार्थस्य बुद्ध्या प्रविभागात्त्वत्र समर्थः ॥ यथा राजपुरुष इ
त्यत्र इति सिद्धान्तवादीनु व्याकरणस्यैवेदं का त्यात् । सामर्थ्यादि दोषावगतिरिति मत्वाह ॥ लौकिकानामिति ॥ लोके विदिता इति ।

शब्दानुशासनं नाम शास्त्रं अधिकृतं वेदितव्यम् ॥ केषां शब्दानां लौकिकानां वैदिकानां च तत्र लौकिकास्तावत् ॥
गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति वैदिकाः खल्वपि ॥ शन्नो देवीरभिष्टये इषे त्वोर्जे त्वा ॥ अग्निमीळे
पुरोहितम् ॥ अग्न आयाहि वीतय इति ॥ अथ गौरित्यत्र कः शब्दः ॥ किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्य
र्थरूपं स शब्दः ॥

व्लोकाभ्यां छन्निति छन् । अथवा भवाधर्ये अध्यायादिवाङ्मू वेदमवा वैदिका वैदिकानामपि लौकिकत्वेपि प्राधान्यख्यापनाय प्र
गुपादानं यथा ब्राह्मणा आयाता वशिष्ठोप्यायात इति तत्र तेषां नु प्राधान्यं यत्नेनावश्यं परिहरणं ॥ अथवा भावाच्छब्दानामेव लौकि
कत्वमिति भेदेन निर्देशः तत्र लोके पदानुपूर्व्या नियमाभावात् पदान्येव दर्शयति गौरश्व इति वेदे त्वानुपूर्वीनियमादृचामनुदाहर
ति ॥ सास्न इति ॥ अथ गौरित्यत्रेति शास्त्रार्थप्रारम्भे देने लोके व्यवहारदर्शनाच्छब्दस्वरूपनिर्धारणाय पृच्छत्यपेति । गौरिति विज्ञा
ने प्रतिभासमानेषु वस्तुषु कः शब्द इत्यर्थः ॥ नामेव वस्तूनि क्रमेणादर्शयति किं यत्तदिति ॥ उद्दिश्यमान प्रतिनिर्दिश्यमानयोरेकत्वं आपा
दयति सर्वनामानि पर्यायेणान्नि द्वितीयमपास्य तदिति काम्यचारतः ॥ सर्वत्र इतिनिर्देशः ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा॰ ८८०
क्रै॰

आगम इति आगमः प्रयोजकः प्रवर्तको नित्यकर्मणां व्याकरणस्याध्ययनस्य प्रयोजनं शब्देन च फलं प्रयोजकस्योपत्तेः निष्कारणमिति दृष्टं कारणमनपे
क्ष्येत्यर्थः प्रधानं चेति षट्पदार्थो वा गमस्य व्याकरणनिमित्तत्वात् मूलत्वात् शास्त्रार्थावधारणस्येति भावः ब्राह्मणेनेति अध्ययनं ब्राह्मणस्यैव
त्तिः न चान्तरेण लघुनोपायेन शक्याः विज्ञातुमिति लाघवेन शब्दज्ञानमस्य प्रयोजनम्। असंदेहार्थमिति संदेहस्य प्रागभावोऽत्र वेदितव्यः ननु प्रध्वंसा
भावः नहि वैयाकरणस्य संशय उत्पद्यानि नश्यन्ति इतरस्यैव तदुत्पादात् स्वरत इति पूर्वपदप्रकृतिस्वराद् बहुव्रीहिः समासान्तोदात्तत्वादित्यर्थः मुख्या

3 आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः। षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति। प्रधानं च षट्स्वङ्गेषु व्या
करणम्। प्रधाने च कृतो यत्नः। फलवान् भवति लघ्वर्थं चाध्येयं व्याकरणम्॥ ब्राह्मणेनावश्यं शब्दा
ज्ञेया इति॥ न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुम्॥ असंदेहार्थं चाध्येयं व्याक
रणं याज्ञिकाः पठन्ति स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति तस्यां संदेहः स्थूला चा
१८॥ सौ पृषती च स्थूलपृषती॥ स्थूलानि वा पृषन्ति यस्याः सा स्थूलपृषती तां नावैयाकरणः स्व
रतोऽध्यवस्यति। यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः। अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति
इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि तेऽसुराः। दुष्टः शब्दः। यदधीतम्॥ यस्तु प्रयुङ्क्ते॰ अविद्वां
सः विभक्तिं कुर्वन्ति॰ यो वा इमां॰ चत्वारि॰ उत त्वः॰ सक्तुमिव॰ सारस्वतीम्॰ दशम्यां पुत्रस्य॰ सुदेवोऽसि॰ नेति
तेऽसुरा इति तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः॰ स्तिव

निष्प्रयोजनानि प्रदर्श्य आनुषंगिकाणि प्रदर्शयति इमानि चेति भूय इति पुनरित्यर्थः आनुषंगिकत्वाच्चैषां वर्गद्वयोपादानं तेऽसुरा इत्यत्र च
म्लेच्छा अर्थवादेन न म्लेच्छितवा इति म्लेच्छनमेवैतद्यदपशब्द इति ... भावे च कर्तव्ये। तदा करणान्त
र्गीत पदद्विर्वचने कार्ये ... द्विर्वचनं लत्वं च म्लेच्छनमित्यपर न म्लेच्छितवा इत्यस्य पर्यायो नापभाषितवा इति कृत्यार्थ इति नैव प्रत्य
यः इति कर्मणि क्तः॰ ॥

अपरे तु। अन्यत्र तु नित्यः स्फोटः ध्वनिभेदस्य व्यञ्जकस्थापितत्वादिहाभेदेन व्यवहारोपि न दोषः इत्याशयेन शब्दव्याख्या इत्यत्र तात्पर्यात् ध्वनिं कुर्वन् लि
धिनिषेधयोः प्रवृत्तिविषयत्वात् कथमस्य त्रिभिः सम्बन्धः उच्यते शब्दं कुर्वन्नपि शब्दं कुर्विति उच्यते॥ किमाग्रहप्रधानानि वनपे॥ तथा नभि
णा दुष्टे जिते नोच्यते मा शब्दं कार्षीरिति॥ कानि पुनरिति। किं सन्ध्योपासनादिवत्॥ व्याकरणाध्ययनं नित्यं कर्म अथ काम्यमिति प्रश्नः॥ पारंपर्ये
णार्थसाधनत्वाभावात्॥ रक्षोहेति। लोके लोपाद्यूहं वेदे दृष्ट्वा ब्राह्मणे वै व्याकरणः वैयाकरणास्तु न भ्रमन्ति वेदार्थं चावस्यन्ति तत्र लोपा
दाहरणं देवा अद्रुहेति दुहेर्लङि झस्य आदादेशे कृते लोपस्त आत्मनेपदेष्विति तलोपः॥ बहुलं छन्दसीति रुडिति रूपमेतत् वर्णि

अथ वा प्रतीतिपदार्थको लोके ध्वनिः शब्द उच्यते तथा मा शब्दं कुरु मा शब्दं कार्षीः॥ शब्दकार्ययं माणवक इ
ति ध्वनिं कुर्वन्नेवमुच्यते तस्माद् ध्वनिः शब्दः॥ कानि पुनरस्य॥ शब्दानुशासनस्य प्रयोजनानि॥ रक्षोहाग
मलघ्वसंदेहाः प्रयोजनं॥ रक्षार्थं वेदानामध्येयं व्याकरणं लोपागमवर्णविकारज्ञो हि सम्यक् वेदान् परिपा
लयिष्यतीति॥ ऊहः खल्वपि॥ न सर्वैर्लिङ्गैः। न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः ते चावश्यं यज्ञ
गतेन यथायथं विपरिणमयितव्याः तान्नावैयाकरणः शक्नोति विपरिणमयितुं तस्मादध्ये
यं व्याकरणम्॥

णा॥ उद्ग्राभं चेति निग्राभं चेति। हृग्रहोर्भः छन्दसि हस्येति वक्तव्यमिति हकारस्य भकारः उदित्यस्य तउद्ग्राभनिग्राभौ च छन्दसि उपसर्गपूर्वो ग्रहेः स
गुणभावे निपातनपो इति वचनात् घञ्॥ ऊहः खल्वपीति। इह प्रक्षिप्तं यागे इति कर्तव्यतोपदिष्टा यागान्तरे सोपजीव्यते सा प्रकृतिः येनोप जीव्य
ते सा विकृतिः॥ प्रकृतिवत् विकृतिः कर्तव्येति मीमांसकैः संस्थापिते न्याये प्रकृतिप्रत्ययादीनामूहं वैयाकरणाः सम्यग्विजानाति तत्राग्नेये
चरौ अस्ति अग्नये त्वा जुष्टं निर्वपामीति॥ तत्र सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम इति सौर्ये चरौ मन्त्र ऊह्यते सूर्याय त्वा जुष्टं निर्वपामीति विजरणा
मन्त्र हरिणा प्रदं प्रोक्त ऊहः॥

श्रु॰आ॰ प्र॰

तिनकारि गि. शब्द: सुस्रक्षेत्रबद्धीनाश्च प्रश्न: पृष्ठे व परमतमाशंक्याह वाग्योगविदेवेति एवमपशब्दज्ञानेपीति यथा श्लेष्मिकद्रव्य सेवया श्लेष्मिको व्याधिर्भवति द्विपरीतसेवया त्वारोग्यं तथा त्राणिष्ठ यो के स्माप्यमिति भाव: भूयांसो ल्पीयांस इति परमतमापेत्तपाप्र कर्षप्रत्यय: यदि मन्यसे बहव: शब्दा: अल्पे ऽपशब्दा: अंगभूयस्त्वाच्च फलभूयस्त्वमिति तत्र यस्माद्भूयांसोऽपशब्दा: अल्पीयां स: शब्दा: अज्ञानमिति यथा चतिर पूर्वां ब्राह्मणस्यादिफलाभाव: नात्यंतायेति पुरुषाणां विधिनिषेधयोरधिकारात्तत्परिज्ञाने

4

क: वाग्योगविदेव कुत एतत् यो हि शब्दान् जानाति अपशब्दानप्यसौ जानाति यथैव हि शब्दज्ञाने धर्म: एवमप शब्दज्ञानेप्यधर्म: अथवा भूयानधर्म: प्राप्नोति भूयांसोपशब्दा अल्पीयांस: शब्दा इति एकैकस्य शब्दस्य बह वोपभ्रंशा: तद्यथा गौरित्यस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोपभ्रंशा: अथ योऽवाग्योगवित् अज्ञानं तस्य शरणं विषम उपन्यास: नात्यंतायाज्ञानं शरणं भवितुमर्हति यो ह्यजानन्वै ब्राह्मणं हन्यात् सुरां वा पिबेत् सोपि मन्ये पतित: स्यात् एवं तर्हि सोऽनंतमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दै: क: अवाग्योगविदेव अथ यो वाग्योगविद्विज्ञानं तस्य शरणं क्व पुनरिदं पठितं भ्राजा नाम श्लोका: किं च भो श्लोका अपि प्रमाणम् किं चात: यदि प्रमाणं अयमपि प्रमाणं भवितुमर्हति ॥ ॥

प्रयत्नस्यन्याय्यत्वात् ऽप्रकरणात्सान पूर्वं बलीय इत्याह अवाग्योगविदिति वाग्योगवित्तु उभयज्ञोपि शब्दान् प्रयुंक्ते नापशब्दानिति ज्ञानपूर्वकात् प्रयोगादभ्युदयभाग्भवति श्लोकस्याप्रसिद्धत्वात्पृच्छति क्व पुनरिति प्रातिपदिकार्थे प्रश्ने एवात्र तात्पर्यं किं तद्विशेषे वेदे पठितमित्यर्थ: अत एव श्लोका इति प्रथमान्तेनोत्तरं अन्यथा श्लोके [illegible]षिति वाच्यं स्यात् आप्तोक्तत्वापरिज्ञानादाह किंच भो इति ॰ ॰

दुष्टः शब्द इति स्वरतः स्वरेण उदात्तादिना वर्णतः । मिथ्याप्रयुक्त इति यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽन्यत्र स्वरवर्णदोषात्प्रतिनिपाद-
भिमतमर्थं नाहेत्यर्थः । वाग्वज्रो हिंसकत्वात् यथेन्द्रशत्रुशब्दः स्वरतो यजमानं हिंसितवानित्यर्थः । इन्द्रस्याभिचारो वृत्रेणाः
यथेन्द्रशत्रुर्वर्द्धस्वेति मंत्र उक्तः तत्र इन्द्रस्य शातयिता शमयिता वा भवेति क्रियाशब्दोऽत्र शत्रुशब्द आश्रितो ननु रूढिशब्दः तदाश्रय
हि तत्पुरुषबहुव्रीह्योरर्थभेदः तत्रेन्द्राभिमतत्वे सिद्धे सति इन्द्रस्य शत्रुर्भवेत्यन्यार्थप्रतिपाद्ये अन्तोदात्ते प्रयोक्तव्ये आद्युदात्त इति मिथ्याप्रयुक्तः
अर्थान्तराभिधानादिन्द्र एव वृत्रस्य शातयिता संपन्नः इन्द्रशत्रुत्वस्य चाविधेः यतः सम्बोधनविभक्तेरनुवाध्यविषयत्वादिहाभावः य

तस्मात् प्रमत्तगीतिनः म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः म्लेच्छा मा भूमेत्यध्येयं व्याकरणमिति सुराः ॥
दुष्टः शब्दः ॥ दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तदर्थमाह स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतो-
ऽपराधादिति दुष्टान् शब्दान् माप्रयुक्ष्महीत्यध्येयं व्याकरणम् ॥ दुष्टः शब्दः ॥ यदधीतं ॥ यदधीतमविज्ञातं निगदेनैव शब्द्य-
ते अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणं ॥ यदधीतं ॥ यस्तु प्र
युंक्ते ॥ यस्तु प्रयुंक्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले सोऽनन्तमाप्नोति जयं परत्र वाग्योगवित् दुष्यति चा
पशब्दैः ॥

जामयजुष्यस्वेति उद्यमानस्य चामंत्रत्वात्प्रकरणेति जपादिपर्युदासेन मंत्राणामेकश्रुतिर्विधीयमाना नेह भवति अ
विताविति ॥ अविदितस्वरादिसंस्कारत्वादर्थापरिज्ञानात् ॥ निगदेनेति । पाठमात्रेणानततः ज्वलतीति निष्फलं भवति
॥ अनर्थकमिति निष्प्रयोजनं । यस्तु प्रयुंक्त इति अनेनाभ्युदयहेतुत्वं व्याकरणाध्ययनस्य दर्शयति ॥ विशेष इति स्वरूपभा
वः कश्चिद्धर्मे । विचित्रमिति न प्रयुक्तः साधुः अन्यथा साधुः यथा स्वरः शब्दो वचनाभावनिमित्तकः साधुः जातिनिमित्तकोऽ
साधुः [illegible] जातिप्रदक्तव्यवहारः ॥

चत्वारीति शब्दस्य वृषभत्वेन निरूपणं त्रयः कालाः इति लडादिविषयाः नित्यः कार्य्यश्चेति व्यंग्यव्यंजकभेदेन सप्त विभक्तय इति सुप इत्यर्थः केचित्तु तिङासपरिग्रह प्रसंगान्सह श्लोकेश सप्त कारकाणि विभक्ति शब्दाभिधेयानीति व्याचक्षते व र्धनादिति कामानां ज्ञानपूर्वकानुष्ठानफलत्वात् महतेति परस्य ब्रह्मण इत्यर्थः चत्वारीत्यनेनैकदेशेन समग्रेण वाक्यान्तरमपि सूच्यते

चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश इति चत्वारि शृंगाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च त्रयो अस्य पादाः त्रयः

5

कालाः भूतभविष्यद्वर्तमानाः द्वे शीर्षे द्वे शब्दात्मानौ नित्यः कार्य्यश्च सप्त हस्ताः सप्त विभक्तयः त्रिधा बद्धः त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसीति वृषभो वर्षणात् रोरवीति शब्दं करोति कुत एतत् रौतिः शब्दकर्मा महो देवो मर्त्यां आविवेशेति महान् देवः शब्दो मर्त्याः मरणधर्माणो मनुष्याः तानाविवेश महता देवेन नः साम्यं स्यादित्यध्येयं व्याकरणं अपर आह चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति चत्वारि वाक्परिमिता पदानि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च तानि विदुर्ब्राह्मणा ये मनीषिणः मनस ईषिणो मनीषिणः ॥

इत्याह अपर आहेति परिमितानीति प्राप्ते छन्दसीति नलोपमिति शेषोऽपि परिमितेति भवति परिमितानि छिन्नान्यनावृत्तीत्यर्थः मनीषिशब्दः पृषोदरादित्वात्साधुः एवं मनीषिण एव विदन्तीत्याह ॥ ॐ नमो भगवते

यदुदुंबरेति अयं श्लोकः सौत्रामण्यां सुरापानस्य दुष्टत्वमुद्भवति प्रमत्तगीत इति प्रमादेन विप्रतिपन्नत्वेन गीत इत्यर्थः कात्यायनो ...
एक भाजारव्य श्लोकमध्य पठितस्त्वतस्य श्रुतिरनुग्राहिकास्ति एकः शब्दः सुज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति त्वौज्ञिवे...
त्यभिवादे हि गुरुणा त्वतः कार्यः यस्तु प्लुतं कर्तुं न जानाति स स्त्रीव इत्यत्यो ऽयंमहमिति न त्वभिवाद्ये देवदत्तोऽहमित्यादिना संह...
वाक्येनेत्यर्थः प्रयाजा इति प्रयाजमंत्रा ऊह्यमाना इति शब्दप्रकृति विभक्तिपुक्ता इत्यर्थः यथा समिधः समिधो ग्ने अग्न...

यदुदुंबरवर्णानां घटीनां मंडलं महत् । पीतं न गमयेत् स्वर्गं किं तत्क्रतुगतं नयेत् प्रमत्तगीत एषः तत्र
भवतो यस्त्वप्रमत्तगीतस्तत्प्रमाणं यस्तु प्रयुंक्ते अविद्वांसः अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुति
विदुः कामन्तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् स्त्रीवन्माभूमेत्यध्येयं व्याकरणं अविद्वांसः विभक्तिं
कुर्वन्ति यो वा इमां पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति आर्त्विजीनाः
स्यामेत्यध्येयं व्याकरणम् यो वा इमाम् ॥ ॥ ॥

अस्य व्याख्या ऋत्विज इति पदश इति पदं पदमिति संख्यैकवचनादिति शस् स्वरश इति स्वर उदात्तादिः अक्षरश इति
अक्षरं व्यञ्जनसहितोऽच् आर्त्विजीन इति ऋत्विजं अर्हतीत्यार्त्विजीनो यजमानः ऋत्विक्कर्मार्हतीति याजको वा
र्त्विजीनः यद्वा ऋत्विजं गच्छति यज्ञ आर्त्विजीनः यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसंख्यानमिति वार्तिकेन च खञ्
विद्वान् यजेत् विद्वान् याजयेदिति द्वयोरपि विद्वयोरधिकारात् ॥ चत्वारोऽध्येयं व्याकरणं प्रयोजनाः [illegible]
याज्ञिकाः पठन्ति प्रयाजाः सविभक्तिकाः कार्य्या इति नचांतरेण व्याकरणं प्रयाजाः
सविभक्ति ... ष्टोः कर्तुम् विभक्ति कर्तुं ... बुद्धि

गृ॰सू॰ पृ॰

यत्रा सखाय इति कश्चित्तु नुष्टिनि दीर्घः सखायः समानख्यातयो मेदग्महस्यनिवतत्वात्सर्वमेकमिति मन्यन्ते सख्यानीति सायुज्या नीत्यर्थः एकगामद्इति स्थाने नैवप्राप्यः वाचीनिवेदाख्यैवग्राम सिरी यास्यति स्मै वेदान्तेषु परमार्थसंविद्ध न सरो तो सेवानिहिता त्यर्थः प्रायश्चित्तीयामिति भवार्थे वक्ष्यमाणः प्रायश्चित्तीयाइति प्रायश्चित्तायपापक्षोधनाय श्रुतिस्मृतिविहिताय कर्मणेयो हितास्तस्मिन्निमित्तोसादकाः मामूमित्यर्थः दशम्युत्तरकालामिति दशाम्याउत्तर इति पंचमीति योगविभागात्समासः नत्त:

यत्रा सखायः सख्यानि जानते अत्रा सखायः समानख्यानयः सख्यानि जानते सायुज्यानि जानते कय

एषः दुर्जोमार्गः एकगाम्यो वा विषयः के पुनस्ते वैयाकरणाः कुतएतत् भद्रैषां लक्ष्मीर्निहिताधिवाचि

६ एषां वाचि भद्रा लक्ष्मीर्निहिता भवति लक्ष्मीर्लक्षणा भासमाना परिवृत्ता भवति ॥ सक्तुमिव ॥ सारस्वतीं ॥

॥६१॥ याज्ञिकाः पठन्ति आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति प्रायश्चित्तीया

मा भूमेत्यध्येयं व्याकरणं ॥ सारस्वतीं ॥ दशम्यां पुत्रस्य ॥ याज्ञिकाः पठन्ति दशम्युत्तरकालं पुत्रस्य जातस्य

नाम विदध्यात् ॥ घोषवदाद्यंतरंतस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भव

॥६६॥ ति द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितमिति नचान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या वि

ज्ञातुम् ॥ दशम्यां पुत्रस्य ॥

कालशब्देन बहुव्रीहिः क्रियाविशेषणं चैतत् दशादिनान्याशो चं भवतीति दशम्युत्तरकालमित्युक्तं येपि गृह्यका

राः पठन्ति दशम्यां पुत्रस्येति तैरपि दशम्यामिति नामेऽपि कर्मधिकरणं व्याख्येयं घोषवदादीति घोषवन्तो पंचवर्णाः

शिक्षायां प्रसिद्धानाः तदादि अन्तरंतस्थमिति मध्ये यरलवा यस्य तदित्यर्थः त्रिपुरुषानूकमिति नामकरणयोग्यकाद

पितातस्य पितेत्रयः पुरुषाः तानित्रपुरुषानुत्पन्नमधिमयानूत्र इति त्रिपुरुषानूकं तद्वाचकं नाम इत्यनूक इति दीर्घः ॥ ॥ ॥ ॥

गुहेति अज्ञानमेव गुहा तस्यामित्यर्थः सुपां सुलुगिति सप्तम्या लुक् व्याकरणप्रदीपेन तु तानि प्रकाशन्ते तत्र चतुर्णां पदजातानां
एकैकस्य चतुर्थं भागं मनुष्या वैयाकरणा वदन्ति नैयायिकास्त्वस्यैव व्याख्यानं चेष्टन्ते न निमिषन्तीति उत त्व इति त्वशब्दो
न्यवाची उतशब्दोपि शब्दस्यार्थे स च भिन्नक्रमः प्रत्यक्षेण शब्दस्वरूपमुपलभमानोपि अर्थापरिज्ञानान्न पश्यति

गुहा त्रीणि निहिता नेङ्गयन्ति गुहायां त्रीणि निहितानि नेङ्गयन्ति न चेष्टन्ते न निमिषन्तीत्यर्थः तुरीयं वाचो
मनुष्या वदन्ति तुरीयं ह वा एतद्वाचो यन्मनुष्येषु वर्तते चतुर्थमित्यर्थः चत्वारि उत त्वः उत त्वः पश्यन्न द
दर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः अपि खल्वे
कः पश्यन्नपि न पश्यति अपि खल्वेकः शृण्वन्नपि न शृणोति एनामिति अविद्वांसमाहार्द्धं उतो त्वस्मै त
न्वं वि सस्रे तनुं विवृणुते जायेव पत्य उशती सुवासाः तद्यथा जाया पत्ये कामयमाना सुवासाः स्वमा
त्मानं विवृणुते एवं वाग्वाग्विदे स्वात्मानं विवृणुते वाङ्नो विवृणुयादात्मानमित्यध्येयं व्याकरणं ॥
उत त्वः ॥ सक्तुमिव ॥ तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत अत्रा सखायः सख्यानि जानते भद्रै
श्रीं षां लक्ष्मीर्निहिताधि वाचि सक्तुः सचतेर्दुर्धावो भवति कसतेर्वा विपरीताद्विकसितो भवति तितउ परिपवनं
भवति ततवद्वा तुन्नवद्वा धीराः ध्यानवन्तो मनसा प्रज्ञानेन वाचमक्रत अकृषत ॥ ॥ ॥

र्थः उतोऽस्मै उत उ इति निपातसमाहारः अविद्वांसमहार्द्धमिति अविद्वल्लयतज्ञस्तरामर्थमर्द्धं च व्याहृत्यर्थः सचते
रतिषु वसेवन दूत्यस्य दुर्धाव इति । रोधः [illegible] पदाकारेण वाचो परा [illegible] त्यर्थः
[illegible] ति एवोदरादित्वात् [illegible] बहुधि [illegible] धीरा इति वैयाकरणाः
[illegible]

भा० प्र०

...रेति शब्दप्रपञ्चयोरित्यर्थः अन्यतरः अन्यतमशब्दावत्प्रत्ययोऽस्माद्विबहुविषये निर्द्धारणे वर्त्तते यथेति अर्थिनामद्यतां व्याप्तं पंचसु पञ्चनखेषु नियम्यमानं साम र्थ्यादन्येभ्यो निवर्त्तते न त्वपूर्वविधिः अप्राप्तेरभावात् किं पुनरिति उभयोपदेशासम्भवे द्वयोरपि प्राप्तयोस्तयोः कोऽन्या यानित्यर्थः इष्टेति साधुशब्दप्रयोगाद्धर्मावाप्तिरित्यर्थः अपशब्दोपदेशात्साक्षात्प्रतिपत्तिर्भवतीति भावः बृहस्पतिरिन्द्रायेति० प्रति

अन्यतरोपदेशेन कृतं स्यात् तद्यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते पञ्च पञ्चनखा भक्ष्या इत्युक्ते गम्यत एतदतोऽन्येऽभक्ष्या इति अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यशूकर इत्युक्ते गम्यत एतदतोऽन्य आरण्यो भक्ष्य इति एवमिहापि यदि तावच्छब्दोप देशः क्रियते गौरित्युक्ते गम्यत एतत् गाव्यादयोऽपशब्दा इति अथाप्यपशब्दोपदेशः क्रि यते ॥ गाव्यादिषूपदिष्टेषु गम्यत एतत् गौरित्येष शब्द इति किं पुनरत्र ज्यायः लघुत्वाच्छब्दोपदेशः लघीया

१३। ञ्छब्दोपदेशः गरीयानपशब्दोपदेशः एकैकस्य शब्दस्य बहवोऽपभ्रंशाः तद्यथा गौरित्यस्य शब्दस्य गावीगो णी गोता गोपोतलिकादयोऽपभ्रंशाः इष्टान्वाख्यानं खल्वपि भवति अथैतस्मिञ्छब्दोपदेशे सति किं श ब्दानां प्रतिपत्तौ प्रतिपाठः कर्त्तव्यः गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठि तव्याः नेत्याह अनभ्युपाय एष शब्दानां प्रतिपदपाठः एवं हि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रति पदोक्तानां शब्दानां पारायणं प्रोवाच नान्तं जगाम बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्य यनकालः न चान्तं जगाम किं पुनरद्यत्वे यः सर्वथा चिरं जीवति स वर्षशतं जीवति०

पदपाठस्याशक्यत्वं प्रतिपादयितुमसमर्थमाह ॥ शब्दानामिति शब्दपारायणशब्दो योगरूढः शास्त्रविशेषस्य तत्र प्रतिपदोक्तानामिति वि शेषणाद्विधानाय कामसमानाख्यायिकापि शब्दानामित्यस्य प्रयोगः एकदेशोपयोगादपि ज्ञेये उपउक्तमित्युच्यते पयोधसत्कृते यद्भूत मात्रैकदेशोपयोगे उपयुक्तं घृतमिति व्यवहारः नवहनेति प्रतिपाद्यते० ॥

ोति वरुण सर्वेषां स्तुतिः यतो हेतोर्व्याकरणाध्ययनात् वरुण सत्यदेवोऽसि ततो हेतोरन्योपि सत्यदेवो भवतीत्यर्थः इति न घट्ट्वविभक्तय इत्य
र्थः अनुक्षरन्तीति तालु प्राप्य प्रकाशन्त इत्यर्थः इति अनेकार्थत्वाद्धातूनामुत्क्षिप्यत इत्यर्थः सूर्म्यमिति सूर्मिमिति प्राप्ते अमिश्यत्र
वा छन्दसीत्यनुवृत्त्यापराधेष्टाः किं पुनरिति ननूक्तानि पुनरेषामिति येन षष्ठ सत्यवकथं पृच्छतीति किं पुनरिति एवं तर्हि भाष्यकारः प्रयोजनान्याख्यान
स्य विषयविभागं दर्शयति पुरा वेदाध्ययनात्पूर्वं व्याकरणमधीयते स्मेत्यादि समर्था इति न प्रयोजनमन्वाख्येयं अद्यत्वे तु सत्याप्युष्टा पूर्वं

॥ सुदेवोऽसि ॥ सुदेवो असि वरुण यस्य ते सप्त सिन्धवः अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव सुदेवो असि वरुण
सत्यदेवोऽसि यस्य ते सप्त सिन्धवः सप्त विभक्तय अनुक्षरन्ति काकुदं तालु काकुर्जिह्वा सास्मिन्नुद्यत इति का
कुदं सूर्म्यं सुषिरामिव तद्यथा शोभनामूर्मिं सुषिरामग्निरन्तः प्रविश्य दहति एवं ते सप्त सिन्धवः सप्त विभक्तय
स्ताल्वनुक्षरन्ति तेनासि सत्यदेवः सत्यदेवाः स्यामेत्यध्येयं व्याकरणं सुदेवो असि ॥ किं पुनरिदं व्याकरणमेवाधि
जिगांसमानेभ्यः प्रयोजनमन्वाख्यायते न पुनरन्यदपि किंचित् ओमित्युक्त्वा वृत्तान्तशः शमित्येव
मादीन् शब्दान् पठन्ति पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते तेभ्यः तत्त
त्स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते तदद्यत्वे न तथा वेदमधीत्य त्वरिता वक्तारो
भवन्ति वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः अनर्थकं व्याकरणमिति तेभ्य एवं विप्रति
पन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद्भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे इमानि प्रयोजनान्यध्येयं व्याकरणमि
ति उक्तः शब्दः स्वरूपमप्युक्तं प्रयोजनान्यप्युक्तानि शब्दानुशासनमिदानीं कर्तव्यं तत्कथं कर्तव्यं किं शब्दो

मेव वेदं प्रधानमधीयते ततः प्रश्नं समर्थेत्वा व्याकरणाध्ययनस्य प्रयोजनं पृच्छन्तीत्यवस्थान्वाख्येयं प्रयोजनं न पुनरन्यदिति वेदमप्यधिजिगां
समानेभ्य इत्यर्थः ओमित्युक्त्वा इति अभ्युपगमेत्यर्थः वृत्तान्तशः इति वृत्तान्तः प्रपाठक उच्यते वृत्तान्तं वृत्तान्तं पठन्तीत्यर्थः अथ वेशब्दो नि
पातोऽस्मिन् काव्य इत्या पत्तिर्भवतीत्युभयोपदेशा उभ्यदि
ः लाघवं गौरवं नु भवतीत्याह ००० ॥

भा०प्र०

के०प०० किं पुनरिति विप्रतिपत्त्या संशयः केचिद् ध्वनिव्यंग्यं वर्णातिरिक्तं शब्दमाहुः अन्ये वर्णव्यतिरिक्तं पदस्फोटमिच्छन्ति वाक्यस्फोटमपरे संगिरन्ते अनेनु
कालेऽनेन शब्दः स च कार्य्यस्तत् व्यतिरेकेणान्यस्यानुपलंभादित्यारब्धमेते संग्रह इति ग्रन्थविरोधे कथं पुनरिति क्रियाचार्येण तु लक्षणशब्दार्थसंबं
धानां अथ स्वरूपेति प्रश्नः सिद्ध इति तत्र नित्यः शब्दो जातिस्फोटलक्षणो व्यक्तिस्फोटलक्षणो वा कार्य्यः प्राकृतिकानामपि मतेन प्रवाहनि
त्यतया अर्थस्यापि जातिलक्षणस्य नित्यताद्रव्यपक्षे सर्वशब्दानां असत्योपाधिप्रवाहिन्नेव जनितत्वेन चामितिनित्यता प्रवाहनित्य

किं पुनर्नित्यः शब्दः आहोस्वित्कार्य्यः संग्रहे ह्येतत् प्राधान्येन परीक्षितं नित्यो वा स्यात्कार्य्यो वेति तत्रोक्ता

८ दोषाः प्रयोजनान्यप्युक्तानि तत्र त्वेष निर्णयः अथापि कार्य्यः उभयथापि लक्षणं प्रवर्त्यमिति कथं
पुनरिदं भगवतः पाणिनेराचार्य्यस्य लक्षणं प्रवृत्तं सिद्धे शब्दार्थसंबन्धे इति सिद्धे शब्दे अर्थे सम्बन्धे
चेति अथ सिद्धशब्दस्य कः पदार्थः नित्यपर्य्यायवाची सिद्धशब्दः कथं ज्ञायते यत्कूटस्थेष्वविचालि
भा०प्र० ष्वभावेषु वर्त्तते तद्यथा सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाशमिति ननु च भोः कार्य्येष्वपि वर्त्तते तद्यथा
सिद्ध ओदनः सिद्धः सूपः सिद्धा यवागूरिति यावता कार्य्येष्वपि वर्त्तते तत्र कुत एतत् नित्यपर्य्यायवा
चिनो ग्रहणं न पुनः कार्य्ये यः सिद्धशब्द इति संग्रहे तावत्कार्य्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्य्या
यवाचिनो ग्रहणमिति इहापि तदेव ०००

लक्षणसंबंधस्यापि व्यवहारपरंपरया अनादित्वान्नित्यता सिद्धशब्दस्य नित्यानित्ययोर्दर्शनात्पृच्छति अथेति नित्येति नित्यलक्षणस्या
र्थस्य पर्य्यायेण वाचकत्वमेवार्थः कदाचिन्नित्यशब्दमाह यदाचिनं सिद्धशब्द इत्यर्थः कूटस्थेष्विति अविनाशिषु अविचालिष्वि
ति देशान्तरप्राप्तिरहितेषु ननु चेति सिद्धशब्दः क्रियानिष्पन्नो यथार्थो अवगम्यत इत्यर्थः संग्रहे तावदिति तत्र हि किं कार्य्यः शब्दो
ऽथ सिद्धशब्द इति पक्षद्वयविचारः कृतः तत्र कार्य्यप्रतिपक्षापेक्षी सिद्धशब्द इति स्थितं तत्समानतन्त्रत्वादि
पितत्पैवयुक्तमित्यर्थः ० भा०प्र०

अन्येवेदेः

चतुर्भिरिति आगमकालो ग्रहणकालः स्वाध्यायकालोऽभ्यासकालः प्रवचनकालोऽध्यापनकालः व्यवहारोपयुक्तकर्मणि ३

दिति सामान्यविशेषोपस्मिन् तत्सामान्यविशेषवत् कर्मण्यणिति आतोऽनुपसर्गे क इत्यादि सकलशास्त्रव्यवस्थैव तत एव ज्ञायते प्रयोगनिमि

निपत्तव्याश्रयत्वं प्रश्नपूर्वकं किं पुनरिति आकृतिपक्षे केवले आ श्रीपमात्रोसकल्पगतो विप्रतिषेधे इत्यादि नोपपद्यते केचित्पि च

व्यक्तिपक्षे पुनः प्रसंगविज्ञानादिति नवृत्ते तस्मात्तस्य सिद्धये क्वचित्प्रदेशे कश्चित्पक्षः परिगृह्यते जातिवादिन आहुः जातिरेव शब्देन प्रतिपाद्यते व्य

क्तीनामानन्त्यात् संबन्धग्रहणासंभवात् सा च जातिः सर्वव्यक्तिष्वेकाकारप्रत्ययदर्शनादवसीयते न जगवादयः शब्दाः भिन्नद्र

चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति आगमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेनेति ।

तत्र चास्यागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात्तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः कथं तर्ही

मे शब्दाः प्रतिपत्तव्याः किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यं येनाल्पेन यत्नेन महतः शब्दौघान् प्रतिपद्येरन्

किं पुनस्तत् उत्सर्गापवादौ कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः कथंजातीयकः पुनरुत्सर्गः कर्तव्यः क

थंजातीयकोऽपवादः सामान्येनोत्सर्गः कर्तव्यः तद्यथा कर्मण्यण् तस्य विशेषेणापवादः तद्यथा आ

तोऽनुपसर्गे कः किं पुनराकृतिः पदार्थः आहोस्विद् द्रव्यमुभयमित्याह कथं ज्ञायते उभयथा ह्याचार्ये

ण सूत्राणि पठितानि आकृतिं पदार्थं मत्वा जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्यामित्युच्यते द्रव्यं

पदार्थं मत्वा सरूपाणामेकशेष आरभ्यते

समवेतां जातिमभिदधाति तस्यां प्रतीतायां तदविनाभावात् तद्वच्छिन्नं द्रव्यं प्रतीयते शुक्लादयः शब्दाः गुणसमवेतां जातिमाचक्षते गुणेन तु तत्सं

बन्धात् प्रत्ययः द्रव्ये संबन्धिसंबन्धात् संज्ञाशब्दानामप्युत्पत्तिप्रभृत्या विनाशात् पिंडस्य कौमारयौवनाद्यवस्थाभेदेपि सर्वावस्था

सभिन्नप्रत्ययनिमित्ता डित्थत्वादिका जातिर्वाच्या क्रियास्वपि जातिर्विज्ञेया धात्वर्थ्या पचति पठति इत्यादेरभिन्नस्य प्रत्ययस्य

सद्भावात्तन्निमित्तं जात्यभ्युपगमः

... यावद्भावेन भ्रमवादान्नान्यादि ...

भाष्य० कैयट० १९५

स्वरूपमिति तत एवाभी रूपेण पि शब्दाः प्रयुज्यन्ते आगोपालांगनं तेषां अन्वाख्यानं स्यात् न विरलप्रयोगाणां विनापि च क्रियापदप्रयोगे रागाभ्यां रूपं व निर्जितं शब्दः प्रयुज्यते यथा आख्यर्थमनित्ये नित्यवीप्सयोरिति अर्थे संबन्धे चेति द्रव्यपदार्थे द्रव्यस्यानित्यत्वात् विग्रह एवां संबंधविशेषणार्थमुपात्तम् अनित्येऽर्थे कथं संबंधस्य नित्यतेति चेत् योग्यता लक्षणत्वात् संबन्धस्य तस्याश्च शब्दाश्रयत्वात् शब्दस्य च नित्यत्वाददोषः

अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते किं तर्हि आभीक्ष्ण्येऽपि वर्तते तद्यथा नित्यप्रहसितो नित्यप्रजल्पित इति यावता आभीक्ष्ण्येऽपि वर्तते तत्राप्यनेनैवार्थः स्यात् व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति पश्यति त्वाचार्यो मंगलार्थं स्वैव सिद्धशब्दमादितः प्रयुङ्क्ते मंगलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते

वैनं नित्यपर्यायवाचिनं वर्णयितुमिति अतः सिद्धशब्दः सर्वोपात्तो न नित्यशब्दः अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते सिद्धे शब्देऽर्थे संबन्धे चेति। आकृतिमित्याह कुत एतत् आकृतिर्हि नित्या द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः सिद्धे शब्देऽर्थे सम्बन्धे चेति नित्यो ह्यर्थवतामर्थैरभिसंबन्धः अथवा द्रव्य एव पदार्थ एष विग्रहो न्याय्यः सिद्धे शब्देऽर्थे सम्बन्धे चेति द्रव्यं हि नित्यं आकृतिरनित्या कथं ज्ञायते एवं हि दृश्यते लोके मृत् कयाचिदाकृत्या युक्ता पिंडो भवति पिंडाकृतिमुपमृद्य घटिकाः क्रियन्ते घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते तथा सुवर्णं कयाचिदाकृत्या युक्तं पिंडो भवति पिंडाकृतिमुपमृद्य रुचकाः क्रियन्ते रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते पुनरावृत्तः सुवर्णपिंडः पुनरपरया आकृत्या युक्तः खदिरांगारसवर्णे कुंडले भवतः आकृतिरन्या चान्या च भवति द्रव्यं पुनस्तदेव आकृत्युपमर्देन द्रव्यमेवावशिष्यते आकृतावपि पदार्थ एष विग्रहो न्याय्यः सिद्धे शब्देऽर्थे संबन्धे चेति ननु चोक्तं आकृतिरनित्येति नैतदस्ति नित्याकृतिः कथम् ॥

ति असत्योपाधव दिन्नं प्रतिनतत्वं द्रव्यशब्दवाच्यमित्यर्थः आकृतिरिति संस्थानं प्रत्यक्षदर्शने च गोत्वादि जाने रूपसत्त्वादनित्यत्वं आत्मैवैः

॥२६॥

अथवेति एवशब्दप्रयोगेऽपि पदमवधारणाद्योतकत्वेन एवशब्दस्यापेक्षणात् पदानुद्योतकमन्तरेण सामर्थ्यादवधारणं गम्यते तदानेकपदमिति सूच्यते न च सर्व एवायोमन्त्रयन्नीत्यत्र भेत्तव्यमिति: सामर्थ्यान्नियममवगम इति अथ एवेति इहापि नित्या नित्यव्यतिरेकेण रूपान्तराभावात् सिद्धशब्दोपादानान्नियमो गम्यते सिद्ध एवेति कार्याणामनुपदार्थानां प्राक्प्रध्वंसाभावयोः सिद्धता नास्तीति ननु सिद्ध एवेति अथवेति कथं पुनरिदमुक्तं शब्दसंज्ञात्वेन विनियुक्ते एकदेशाः प्रयुज्यन्ते न समस्तो संज्ञात्वेन विनियुक्तः न चैकदेशान्न्वर्थमानस्य समुदायस्य वाचकत्वमुपपद्यते प्रतीयमानस्य प्रत्यायकत्वासंभवादुच्चार्यमाणस्यैवावाचकत्वात् एवं तर्हि अनुनिष्पादितो न्यो अवयवरूपाः संज्ञा विनियोगकाले विनियुक्ताः

अथवा संते केपदान्यप्यवधारणानि तद्यथा अब्भक्षो वायुभक्ष इति अप एव भक्षयति वायुमेव भक्षयतीति गम्यते एवमिहापि सिद्ध एव न साध्य इति अथवा पूर्वपदलोपो द्रष्टव्यः अत्यन्तसिद्धः सिद्ध इति तद्यथा देवदत्तो दत्तः सत्यभामा भामेति अथवा व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः किं पुनरनेन वर्णेन किं न महता कण्ठेन नित्यशब्द एवोपात्तः यस्मिन्नुपादीयमाने संदेहः स्यात् मङ्गलार्थं माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुक्ते मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति आयुष्मत्पुरुषाणि च अध्येतारश्च सिद्धार्था यथास्युरिति। ॥ ॥

वर्णोपलब्धस्मीनां साधुत्वं माभूदित्यन्वाख्यायते इहापि नित्यानित्ययोर्भिन्नत्वाविशेषात् सिद्धश्रुतिर्नुपान्नाप्रकर्षं गमयति अतंत सिद्ध इति न्याय्या शब्दादीनां स्थितं नित्यत्वमाह अथवेति नहि संदेहमात्रादलक्षणता भवति पुनःप्रमाणान्तरेण निश्चयोत्पादात् वर्णेनेति प्रप्रल व्याख्यानत्वेनेत्यर्थः माङ्गलिक इति अर्गहितार्थी कार्यं तिद्धि मङ्गलं तत्प्रयोजन आचार्यो माङ्गलिकः प्रथन्त इति अध्ययनस्याविच्छेदात् [illegible] नुष्ठाने [illegible] पूर्वइंता न सिद्धार्था इति अध्ययनानिष्पत्ति दर्शितवांसि ॥ ॥ ॥ ॥

भाष्य-
कै० पु०

तावत्तेषामर्थमिति बुध्यावस्तु निरूप्येत्यर्थः अत्र भाष्यकारेण संभवन्तीमप्येकशब्दानामाक्षिप्य वाक्यमेवं स्थापितं सिद्धे शब्दार्थसम्बन्धे शास्त्रप्रवृत्तमेवं
वाक्यं कथं ज्ञायत इति प्रश्ने लोकतो ज्ञायत इति द्वितीयं लोकत इत्यस्याव्यया लोकतोऽर्थप्रयुक्त इत्यादि तत्तोपं शब्दप्रयोग इति प्रयोगग्रहणेन प्रयो
गाद्धर्मो न तु ज्ञानमात्रादित्युक्तं भवति अर्थे नाम प्रत्यायनाय प्रयुक्तोऽर्थप्रयुक्तः धर्मनियम इति चतुर्थ्यां तादर्थ्ये प्रतिपाद्यते समसम्बन्धस
मान्ये तु षष्ठी विधाय समासः कर्तव्यः चतुर्थीसमासस्य प्रकृतिविकृतिभाव एव विधानात् धर्मार्थ इति धर्मार्थत्वान्नियम एव धर्मशब्देना
भिधीयत इति कर्मधारयसमासः धर्मप्रयोजन इति लिङादिविषयेण नियोगाख्येन धर्मेण प्रयुक्त इत्यर्थः प्रियतद्धिता इति नायमपशब्दः किन्तुवै

10 तावत्तेषामर्थमुपादाय शब्दान् प्रयुंजते यदि तर्हि लोक एव वस्तुशब्देषु प्रमाणं किं शास्त्रेण क्रियते लोकतोऽर्थप्रयुक्ते श
ब्दप्रयोगे शास्त्रेण धर्मनियमः लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते किमिदं धर्मनियम इ
ति धर्माय नियमो धर्मनियमः धर्मार्थो वा नियमो धर्मनियमः धर्मप्रयोजनो वा नियमो धर्मनियमः यथा लौकिक
॥१०॥ वैदिकेषु प्रियतद्धिता दाक्षिणात्याः यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुंजते अथवा यु
क्त एव तद्धितार्थः यथा लौकिकेषु वैदिकेषु च कृतान्तेषु लोके तावत् अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्य ॥१०॥
शूकर इत्युच्यते भक्ष्यं च नाम क्षुत्प्रतिघातार्थमुपादीयते शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुं तत्र
नियमः क्रियते इदम्भक्ष्यमिदमभक्ष्यमिति ।०

लोकवेदशब्दाभ्यां तदवयवास्ते लोकवेदशब्दाभ्यामभिधातुमारभ्यन्ते आचाराद्येकल्पनया तु न द्वितप्रयोगः प्रियतद्धितत्वे निमित्तः प
र्याकस्थित्वन्तस्यत इति प्रयुंक्ते कश्चित्तु ज्ञानस्यन्त्यमिति समूहप्रत्ययान्तं अथवेति नात्रावयवावयविभावः किन्तर्हि लोकवेदव्यतिरिक्ताः
सिद्धान्ताः शब्दार्था भय इत्यर्थः लौकिकः स्मृत्युपनिबद्धः वैदिकः श्रुत्युपनिबद्धः॥ शक्यञ्चानेनेति शाकैः कर्मसामान्येऽलिंगसर्वना
मनपुंसकं पुंक्ते कृत्प्रत्ययः ततः पदान्तरसंबन्धादुपजायमानमपि स्त्रीत्वं बहिरंगत्वादन्तरंगं संस्कारं न बाधत इति शाक्यं त्वितिदित्युक्तं यदा
नुपूर्वमिव विशेषविवक्षा न तदा शक्यातुदित भवत्येव यदा तु प्रतिघातस्य क्षुत्कर्मभावकल्पनात् प्रतिघातः तदा क्षुधं प्रति हन्तुं शक्यमिति भवति ०

न क्वचिदुपरतेति अनभिव्यक्तेरित्यर्थः अद्वैतेन लौकिकव्यवहाराभावात् व्यवहारे चाकृतेरेकाकारपरामर्शहेतुत्वान्नित्यत्वं अपाय इति असत्त्वेऽपि तत्त्वलोकव्यवहाराश्रयो नेजातेर्नित्यत्वं साध्यते त्रिविधा चानित्यता संसर्गानित्यता यथा स्फटिकस्य जपापुष्पोपधाने स्वरूपतिरोधाने पररूपप्रतिभासः उपधानापगमे स्वरूपप्रतिभासात्तु परिणामानित्यता यथा बदरीफलस्य श्यामतातिरोभावे लौहित्यस्याविर्भावः प्रध्वंसानित्यता सर्वात्मना विनाशः एतत्त्रिविधानित्यताप्रतिक्षेपेण नित्यतां प्रतिपादयितुमुक्तं ध्रुवमित्यादि न मध्ये कूटस्थमिति सं

न क्वचिदुपरतेति क्वचित्सर्वत्रोपरता भवन्ति द्रव्यान्तरस्था तूपलभ्यन्ते अपायाने … दमेव नित्यलक्षणं ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्ययोगि यत्तन्नित्यमिति तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते किंपुनस्तत्त्वं तद्भावस्तत्त्वं आकृतावपि तत्त्वं न विहन्यते अथवा किं न एतेनेदं नित्यमिदमनित्यमिति यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते सिद्धे शब्देऽर्थे सम्बन्धे चेति कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः सम्बन्धश्चेति लोकतः यल्लोकेऽर्थमर्थमुपादाय शब्दान् प्रयुञ्जते नैषां निर्वृत्तौ यत्नं कुर्वन्ति ये पुनः कार्या भावा निर्वृत्तौ तावत्तेषां यत्नः क्रियते तद्यथा घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाह कुरु घटं कार्यमनेन करिष्यामीति न तद्वच्छब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह कुरु शब्दान् प्रयोक्ष्य इति ॥

सर्गानित्यता परिहृता अविचालीति परिणामानित्यता अनपायेत्यादिना प्रध्वंसानित्यता यन्नित्यमिति बुद्धिप्रतिभासः शब्दार्थोपद पदार्थशब्देनोच्यते न तदर्थीकारा बुद्धिरूपापन्ने तु प्रवाहनित्यत्वादर्थस्य नित्यत्वमित्यर्थः लोकत इति अन्यथा कार्येष्विव तु लोकव्यवहारेऽन्यथा नित्येषु शब्देषु व्यवहारो न दृष्टः व्यवहारपरंपरया अनुत्पत्तिपूर्वक इति शब्दादीनां नित्यत्वं वेदादपत्यापत्ति मार्तिभिरन्यत आनीयते …

प्र०
३२८० ... कश्चेदानीमित्युपहासपरं उत्तरं तु शास्त्ररक्षा प्रकृतिप्रत्ययादिसद्भावादनुमितसत्ताः व्यवहारे तु न दृश्यन्त इत्युक्तं न त्वहं लोक इति य
था लोके पांचरात्रमात्रं शब्दं प्रयुंक्ते नैवं मयैतेऽर्थे प्रयुक्ताः अपि तु स्वरूपपदार्थका इत्यर्थः अर्थे शब्दप्रयोगादिति अर्थसद्भावः शब्दसद्भावे लिं
गं न हि विना शब्देनार्थप्रत्यायनमुपपद्यते इत्यतोऽन्यथा सिद्धतामाह अप्रयोग इति यतोऽन्येषामर्थानां सन्ति वाचका अतो नैषां मन्त्रमा

इदं तावत् विप्रतिषिद्धं यदुच्यते संति वै शब्दा अप्रयुक्ता इति यदि संति नाप्रयुक्ता अथाप्रयुक्ता न संति संति
११ चाप्रयुक्ताश्चेति विप्रतिषिद्धं प्रयुंजान एव खलु भवान् आह संति शब्दा अप्रयुक्ता इति कश्चेदानीमन्यो भव
ज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात् नैतद्धि विप्रतिषिद्धं संतीति तावद्ब्रूमः यदेतान् शास्त्रविदः शास्त्रेणानु
प० ज० विदधते अप्रयुक्ता इति ब्रूमः यल्लोकेऽप्रयुक्ता इति यदप्युच्यते कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां
पस्प प्रयोगे साधुः स्यात् न ब्रूमोऽस्माभिरप्रयुक्ता इति किं तर्हि लोकेऽप्रयुक्ता इति ननु च भवानप्यभ्यन्तरो लोके अभ्य
न्तरोऽहं लोके न त्वहं लोकः अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात् अस्त्यप्रयुक्त इति चेत् तन्न किं कारणं अ ॥१॥
र्थे शब्दप्रयोगात् अर्थे शब्दाः प्रयुज्यन्ते संति चैषां शब्दानामर्थाः येष्वर्थेषु प्रयुज्यन्ते अप्रयोगः प्रयोगान्यत्वात् अ
प्रयोगः खल्वप्येषां शब्दानां न्याय्यः कुतः प्रयोगान्यत्वात् यदेतेषां शब्दानामर्थेऽन्यान् शब्दान् प्रयुञ्जते त
द्यथा ऊषेत्यस्य शब्दस्यार्थे क्व यूयमुषिताः तेरेत्यस्यार्थे क्व यूयं तीर्णाः चक्रेत्यस्यार्थे क्व यूयं कृतवन्तः पेचे
त्यस्यार्थे क्व यूयं पक्ववन्त इति अप्रयुक्ते दीर्घसत्रवत् यद्यप्यप्रयुक्ताः अवश्यं दीर्घसत्रवल्लक्षणेनानुविधे
याः तद्यथा दीर्घसत्राणि वार्षशतिकानि वार्षसहस्रिकाणि च न चाद्यत्वे कश्चिदप्याहरति केवलमृषिसंप्रदायो
धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते ॥ ०

न उपपद्यते यद्यप्यूषेत्यस्योषिता इति ... अपि तत्प्रत्यायनाय पदान्तरसहि
तः प्रयुज्यते संप्रत्यप्रयुज्यमानानामपि पूर्वं प्रयुक्तत्वादनुशासनं कर्तव्यमित्याह अप्रयुक्त इति ऋषिसंप्रदाय इति वेदाध्ययं

खेदादिति। खेदयतीति खेदो रोगः इन्द्रियनिरोधमात्रसामर्थ्यं वा खेदः यथोऽप्रतिपत्ति सत्वामर्थितात्राप्यमस्व प्रनयतीति सामर्थ्यान्नियमोऽयं न तु वि
धिः अर्थित्वाभावे कारणाभावात् समानायामिति यद्यपि साक्षादपभ्रंशा न वाचकास्तथापि सामर्थ्यमाशासाधुशब्दव्यवधानेनार्थं प्रत्याय
यन्ति केचित्त्वपभ्रंशाः परंपरया निरूढिमागताः साधुशब्दानस्मारयत एवार्थं प्रत्याययन्ति अन्ये तु मन्यन्ते साधुशब्दवदपभ्रंशा अपि
प४

तथा खेदात्स्त्रीषु प्रवृत्तिर्भवति समानश्च खेदो गम्यायां चागम्यायां च तत्र नियमः क्रियते इयं गम्येयमगम्ये
ति वेदे खल्वपि पयोव्रतो ब्राह्मणः यवागूव्रतो राजन्यः आमिक्षाव्रतो वैश्य इत्युच्यते व्रतं च नामाभ्यवहारार्थमु
पादीयते शक्यं चानेन शालिमांसादीन्यपि व्रतयितुं तत्र नियमः क्रियते तथा बैल्वः खादिरो वा यूपः स्यादित्युच्यते
यूपश्च नाम पश्वनुबन्धार्थमुपादीयते शक्यं चानेन यत्किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबंधुं त
त्र नियमः क्रियते तथाग्नौ कपालान्यधिश्रित्याभिमन्त्रयते भृगूणामंगिरसां घर्मस्य तपसा तप्यध्वमिति
अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि संतापयति तत्र नियमः क्रियते एवं क्रियमाणमभ्युदय
कारि भवतीति एवमिहापि समानायामर्थगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते
शब्देनैवार्थोऽभिधेयो नापशब्देनेति एवं क्रियमाणमभ्युदयकारि भवतीति अस्त्यप्रयुक्तः संति वै श
ब्दाः अप्रयुक्ताः तद्यथा ऊष तेर चक्र पेच इति किमतो यत्संत्यप्रयुक्ताः प्रयोगाद्धि भवाञ्छब्दानां
साधुत्वमध्यवस्यति य इदानीमप्रयुक्ताः नामी साधवः स्युः ॥ ॥

साक्षादर्थस्य वाचका इति अस्त्यप्रयुक्त इति प्रयोगमूलत्वादस्याः स्मृतेरप्रयुक्तानामयमन्वाख्यानादप्रामाण्यमनेनाशङ्कते यथाबुद्धि
[illegible] दिनाप्यर्थं क्रियमाणस्य लंगमयते तेषां [illegible] सर्वदा व्यवहारप्रयुज्यमाना यतः सत्येनावसीयन्ते इत्याह ॥ ॥ ॥

च॰१ छि॰१ तु॰५

भाष्य॰ कैयट॰ आचारे नियम प्रयोगे आशिषैवं नच प्रयत्न इति यदि प्रयत्नेन विना फलं स्यात् प्रयत्नस्य वैयर्थ्यमापद्येतेत्यर्थः व्यतिरेक इति परिहा
रः ननु तुल्यमिति वेदः शब्दोपस्थार्थस्य स वेदशब्दः तस्य यथा ज्ञात्वानुष्ठानं तथा शब्दानामपि प्रकृत्यादिविभाग ज्ञानपूर्वक प्रयोगा इत्य

आचारे नियमः आचारेण न क्वचिन्नियमं वेदयते तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुरिति अस्तु तर्हि प्रयोगे प्रयोगे
सर्वलोकस्य यदि प्रयोगे धर्म्मः सर्वो लोकोऽभ्युदयेन युज्येत् कश्चेदानीं भवतो मत्सरः यदि सर्वो लोकोऽभ्युदयेन युज्येत्
२२ न खलु कश्चिन्मत्सरः प्रयत्नानर्थक्यं भवति फलवता नाम प्रयत्नेन भवितव्यं न च प्रयत्नः फलाद्व्यतिरेच्यः ननु च ये
कृतप्रयत्नाः ते साधीयः शब्दान् प्रयोक्ष्यन्ते अत एव साधीयोऽभ्युदयेन योक्ष्यन्ते व्यतिरेकोऽपि वै लक्ष्यते दृश्यन्ते हि कृ
॥२२॥ तप्रयत्नाश्चाप्रवीणाः अकृतप्रयत्नाश्च प्रवीणाः तत्र फल व्यतिरेकोऽपि स्यात् एवं तर्हि नापि ज्ञान एव धर्मो
नापि प्रयोग एव किं तर्हि शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन शास्त्रपूर्वकं यः शब्दान् प्रयोक्ते सोऽभ्युदये ॥२२॥
न युज्यते तत्तुल्यं वेदशब्देन वेदशब्दा अप्येवमभिवदन्ति योऽग्निष्टोमेन यजते य उ चैनमेवं वेद योऽग्निं नाचि
केतं चिनुते य उ चैनमेवं वेद अपर आह तत्तुल्यं वेदशब्देनेति यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो
भवन्ति एवं यः शास्त्रपूर्वकं शब्दान्प्रयुंक्ते सोऽभ्युदयेन युज्येतइति अथवा पुनरस्तु ज्ञान एव धर्म इति ननु
चोक्तं ज्ञाने धर्म इति चेत्तथाधर्म इति। ० ० ० ०००

र्थः अपर आहेति वेदश्चासौ शब्दश्चेति वेदशब्द इति कर्म्मधारयः अथवेति अपशब्दज्ञान नान्तरीयकत्वाच्छब्दज्ञा
नस्य पृथक्फलमपशब्दज्ञानस्य नास्तीत्यर्थः ० ० ०

सर्व इति इदमत्र तात्पर्यं यस्य कस्यचिद्वचनादप्रयोगात्प्रयोगोभावो न सिध्यति अपितु शिष्टानामेव वचनात् वाकोवाक्यं भेदेनोक्तिप्रत्युक्तिरूपो ग्रन्थ उच्यते यथा किंस्विदावपनं महद्भूमिरावपनं महदिति पूर्वचरितसंकीर्तनमितिहासः वंशाद्यनुकीर्तनं पुराणं विकार इति जीवतोऽन्यावस्था विकारस्तत्रैवार्थः किंपुनरिति एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति श्रुतिः

सर्वे देशान्तरे सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते न चैवोपलभ्यन्ते उपलब्धौ यत्नः क्रियतां महान्हि शब्दस्य प्रयोगविषयः सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्याः बहुधा भिन्नाः एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदः वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावान् शब्दस्य प्रयोगविषयः एतावन्तं शब्दस्य प्रयोगविषयमननुनिशम्य सन्त्यप्रयुक्ता इति वचनं केवलं साहसमात्रमेव एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते तद्यथा शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति विकार एनमार्या भाषन्ते शव इति हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्यमध्येषु गमिमेव त्वार्याः प्रयुञ्जते दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दाः एतेषामपि प्रयोगो दृश्यते क्व वेदे तद्यथा सप्तास्ये रेवतीरेवदूष यद्वो रेवती रेवत्यं तदूष यन्मे नरः श्रुत्यं ब्रह्म चक्र यत्रा नश्चक्रा जरसं तनूनामिति किंपुनः शब्दज्ञाने धर्मः आहोस्वित्प्रयोगे कश्चात्र विशेषः ज्ञाने धर्म इति चेत्तथा अधर्मः प्राप्नोति यो हि शब्दान् जानाति अपशब्दानप्यसौ जानाति यथैव शब्दज्ञाने धर्मः एवमपशब्दज्ञानेऽप्यधर्मः अथवा भूयानधर्मः प्राप्नोति भूयांसो ह्यपशब्दाः अल्पीयांसः शब्दाः एकैकस्य शब्दस्य बहवोऽपभ्रंशाः तद्यथा गौरित्यस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः

तत्र किं सम्यक् ज्ञातः कामधुग्भवति सुप्रयोगात् सम्यक् ज्ञानत्वानुमानमित्यर्थः आहोस्वित्सुप्रयुक्तः कामधुग्भवति सुप्रयुक्तत्वं तु सम्यक् ज्ञानादित्यर्थ इति ... शब्दः ... रां ... लहद्व्यं ... तु ... जायेः तन्नेह

श: तु प्रतिपत्तिरिति न हि व्याख्यानशब्दात् तस्मात्रश्रवणात् शब्दाः प्रतीयन्ते समुदितमिति समुदायादेवावसायोत्पादादित्यर्थः प्रकृति करणे ल्युड् विधीयते शब्द एव व्याक्रियमाणत्वात् कर्म ननु कर्मणीति भवे चेति शब्दस्याप्यन्यो व्यापकत्वेन भवोपयोग इति

शब्दाप्रतिपत्तिः शब्दानां चाप्रतिपत्तिः प्राप्नोति व्याकरणान्न ह्यत्र शब्दा न्प्रतिपद्यामह इति न हि सूत्रत एव शब्दान्प्रतिपद्यते किं तर्हि व्याख्यानत एव ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति न केवलानि चर्चापदानि व्याख्यानं वृद्धिः आत् ऐजिति किं तर्हि उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति एवं तर्हि शब्दः शब्दे ल्युडर्थः यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते व्याक्रियन्ते शब्दा अनेनेति व्याकरणं न हि शब्देन किंचिद् व्याक्रियन्ते केन तर्हि सूत्रेण भवे च तद्धितः भवे च तद्धितो नोपपद्यते व्याकरणे भवो योगो वैयाकरण इति न हि शब्दे भवो योगः क्व तर्हि सूत्रे प्रोक्तादयश्च तद्धिताः प्रोक्तादयश्च तद्धिता नोपपद्यन्ते पाणिनिना प्रोक्तं पाणिनीयं आपिशलं काशकृत्स्नमिति न हि पाणिनिना शब्दाः प्रोक्ताः किं तु सूत्रं किमर्थमिदमुभयमुच्यते भवे प्रोक्तादयश्च तद्धिता इति न प्रोक्तादयश्च तद्धिता इत्येव भवेऽपि तद्धितश्चोदितः स्यात् पुरस्तादिदमाचार्येण दृष्टं भवे च तद्धित इति तत्पठितं तत उत्तरकालमिदं दृष्टं प्रोक्तादयश्च तद्धिता इति तदपि पठितं न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति अयं तावददोषः यदुच्यते शब्दे ल्युडर्थ इति नावश्यं करणाधिकरणयोरेव ल्युड् विधीयते किं तर्हि अन्येष्वपि कारकेषु कृत्यल्युटो बहुलमिति तद्यथा प्रस्कन्दनं प्रपतनमिति ० ०

चेत् मीमांसादिप्रयोगस्यापि शब्दप्रतिविचारकत्वाद्व्याकरणत्वप्रसंगः ... इति जहत्स्वार्थप्रपञ्चाभ्यां भू त्वं सूत्रवत् वार्त्तिकानामुपपन्नत्वादाभावः प्रस्कन्दनमिति यद्यप्यपांभीमादिः कृत्यल्युटो बहुलमित्यस्यैव इति मादय

13 ॥१३॥ ॥१३॥

दोषइति। उत्कृष्टधर्मफलावाप्तौ स्वल्पमधर्मफलमुत्पन्नमप्युत्पन्नं न कल्पं भवतीत्यर्थः प्रत्यक्षधर्माण इति योगप्रत्यक्षेण सर्ववि
दितवन्तः परापरज्ञा इति विद्याविद्याप्रविभागज्ञाः अथेति उक्तमिदं न चान्तरेण व्याकरणमित्यादि तत्रपक्षद्वयेपि दोषदर्श

नेपदोषः शब्दप्रमाणकाः वयं यच्छब्द आह तदस्माकं प्रमाणं शब्दश्च शब्दज्ञाने धर्ममाह नापशब्दज्ञानेऽ
धर्मं आह यच्च पुनरशिष्टाप्रतिषिद्धं नैव तद्दोषाय भवति नाभ्युदयाय तद्यथा हिक्कितहसितकण्डूयितानि नैव दो
षाय भवन्ति नाभ्युदयाय अथवाभ्युदयाय इत्यापशब्दज्ञानं शब्दज्ञाने यो ह्यपशब्दान् जानाति शब्दानप्यसौ जा
नाति तदेवं ज्ञाने धर्म इति ब्रुवतोऽर्थादापन्नं भवति अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्म इति अथवा कूपखा
नकवदेतद्भविष्यति तद्यथा कूपखानकः कूपं खनन् कूपं यद्यपि मृदा पांसुभिश्चावकीर्णो भव ५७
ति सोऽप्सु संजातासु तत एव तं गुणमासादयति येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवति ए
वमिहापि यद्यप्यपशब्दज्ञानेऽधर्मः तथापि यस्त्वसौ शब्दज्ञाने धर्मः तेन स च दोषो निर्घानिष्यते भूयसा
चाभ्युदयेन योगो भविष्यति यद्यप्युच्यते। आचारे नियम इति याज्ञे कर्मणि स नियमः अन्यत्रानि
यमः एवं ह्यूयन्ते यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञाः विदितवेदितव्या अ
धिगतयाथातथ्याः ते तत्रभवन्तः यद्वानस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते या
ज्ञे पुनः कर्मणि नापभाषन्ते तैः पुनः असुरैर्याज्ञे कर्मण्यपभाषितं ततस्ते पराभूताः अथ व्याकर
णमित्यस्य शब्दस्य कः पदार्थः सूत्रं सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्य
ते व्याकरणस्य सूत्रमिति किं हि तदन्यत्सूत्राद्व्याकरणं यस्यादः सूत्रं स्यात् ॥

नान्यपदार्थप्रश्नः षष्ठ्यर्थ इति [illegible] लाभावः सामान्यविशेषभावः
[illegible] इत्यंगो न विरुध्यते सदा षष्ठ्यर्थे कंदिग्धः सूत्रशब्दो [illegible] षष्ठ्यर्थोऽनुपपद्यते ॥

कै.५८० आनइति निपातः अनर्थकं हेतोरित्यर्थः नादइति नेनदित्यर्थः अथशब्दादीर्थ इति तथा दोषमात्रं मेव प्रगृह्यतेत्यर्थः कि
मर्थमिति नहिवर्णोपदेशेन कस्यचित्साधुशब्दस्यानुशासनमितिभावः वृत्तिसमवायार्थ इति लाघवेनशास्त्र प्रवृत्त्य इत्यर्थः धर्म
नियमवत्समासः इत्यर्थ इति शास्त्रप्रवृत्तिः प्रत्यासन्न लंसमवायस्य दर्शयति इयशाइत्यादो हि यथासंख्यशास्त्रवर्णसंसक्तिः

मि२

आत स्वसूत्रतएवपाधुत्सूत्रं कथयेन्नादोग्छेत् अथकिमर्थो वर्णानामुपदेशः वृत्तिसमवायार्थो वर्णानामुपदेशः
१४ कर्त्तव्यः किमिदं वृत्तिसमवायार्थ इति वृत्तयेसमवायो वृत्तिसमवायः अन्यर्थो वा समवायो वृत्तिसमवायः वृत्ति
प्रयोजनो वा समवायो वृत्तिसमवायः कापुनर्वृत्तिः शास्त्रप्रवृत्तिः अथकः समवायः वर्णानामानुपूर्व्येण
सन्निवेशः अथक उपदेशः उच्चारणं कुतएतत् दिशिरुच्चारणक्रियः उच्चार्यं हि वर्णानाह उपदिष्टाइमे
॥१५॥ वर्णाइति अनुवंधकरणार्थश्च अनुवंधकरणार्थश्च वर्णानामुपदेशः कर्त्तव्यः अनुवंधानासंस्या
मीति नह्यनुपदिश्य वर्णान नुवंधाः शक्याः आसंक्तं सएष वर्णानामुपदेशो वृत्तिसमवायार्थश्चा
नुवंधकरणार्थश्च वृत्तिसमवायश्चानुवंधकरणंच प्रत्याहारार्थ प्रत्याहारोप्यर्थः इष्टबुद्ध्यर्थश्च इ
ष्टबुद्ध्यर्थश्च वर्णानामुपदेशः इष्टान्वर्णान् मोत्स्यामइति नह्यनुपदिश्य वर्णानिष्टावर्णाः शक्या
वि ज्ञातुं इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः इष्टबुद्ध्यर्थश्चे
ति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्त्तव्यः एवंगुणाअपिहि वर्णा इष्यन्ते ००
वेशमात्रादेवतिष्ठते वृत्तिप्रयोजन इति पारंपर्येण शास्त्रप्रवृत्तावस्यांगत्वं सतिहि समवाद इत्तं शतत आदिरंत्येनेति ततो हलो
पइत्यादिषु शास्त्रप्रवृत्तिः प्रत्याहारार्थमिति प्रत्याहारशब्देन अणादिकाः संज्ञा उच्यते इष्टबुद्ध्यर्थश्चेति वृत्तिरुपदेशे कत्वादिदो
षरहिताये वर्णा निर्दिष्टास्तेन पैव प्रयोक्तव्या इत्युक्तं भवति एकश्रुत्यासूत्राणां पाठात्सर्वे षामुदात्तादीनामुपदेशः कर्त्तव्यः

गौरित्युक्ते इति सास्नादिमति पदार्थे चित्यत्यं गौरित्युच्यते न [illegible] दातत्र वाचकांतराणां निवृत्तिः कृता भवति एवमस्मिन्नुदा
हरणे उपन्यस्ते सर्वाणि तत्सदृशानि शब्दांतराणि प्रतीपन्ते पूर्वं पंचालाइति जनपदान्तर निवृत्ति विवक्षायामेकदेशेपि स
मुदायरूपारोपात्प्रयोगः नैतमिति यदो [illegible] संस्कृता द्वलन्तैल्लमात्राभवति तदेतन्नुदाहरणं आकृति वाचित्वेनु ह्यत

अथवा शब्दैरपि शब्दाव्याक्रियन्ते तद्यथा गौरित्युक्ते सर्वे संदेहा निवर्त्तन्ते नाश्वो न गर्दभ इति अयं तर्हि दोषः
भवेत् प्रोक्तादय श्च न सिद्ध्यन्ति इति एवं तर्हि लक्ष्यलक्षणे व्याकरणं लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति
किं पुनर्लक्ष्यं किं लक्षणं शब्दो लक्ष्यः सूत्रं लक्षणं एवमप्ययं दोषः समुदाये व्याकरण शब्दः प्रवृत्तो वयवे नो
पपद्यते सूत्राणि चाप्यधीयान इष्यते वैयाकरणाइति नैष दोषः समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि
वर्त्तन्ते तद्यथा पूर्वे पंचालाः उत्तरे पंचालाः तैलं भुक्तं घृतं भुक्तं शुक्लो नील इति कृष्ण इति एवमयं समुदाय
व्याकरण शब्दः प्रवृत्तो वयवेपि वर्त्तते अथवा पुनरस्तु सूत्रं ननु चोक्तं सूत्रे व्याकरणे षष्ठ्यर्थो नुपपन्न
इति नैष दोषः व्यपदेशिवद्भावेन भविष्यति यत्तर्हि [illegible] दप्युच्यते शब्दाप्रतिपत्तिरिति नहि सूत्रत एव शब्दा
न्प्रतिपद्यन्ते किं तर्हि व्याख्यानतश्चेति परिहृतमेतत् तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति ननु चोक्तं
न केवलानि चर्चापदानि व्याख्यानं वृद्धिः आदैजिति किं तर्हि उदाहरणं प्रत्युदाहरणं [illegible] वाक्याध्या
हार इत्येतत्समुदितं व्याख्यानं भवति अविजानत एतदेवं भवति सूत्रत एव हि शब्दान्प्रतिपद्यन्ते ॰ ॰

तैलं [illegible] [illegible]ः संस्थान प्रमाण निरपेक्षा सर्व[illegible]मुख्यावृत्तिः [illegible] ति अथ [illegible] पवयवे अवय वांतरस्य [illegible] तया त्समु
दायस्य [illegible] [illegible] नापि वस्तुनि [illegible] [illegible]
[illegible] एवमिहापि व्याकरणशब्देन [illegible] व्याहृते [illegible] व्याकरणानुबलमुच्यते सूत्र शब्देनतु समुदाय रूपत

भ्वा॰

...ङ्गं चे रिति वेयाख्यानेऽन्त्यमधिकारार्थम् । एवमाम्नानेपदार्थं कत्वादिकं प्रतिज्ञापकत्वादात्मनेपदमित्यादिकमिष्यते न
नुदात्तङित इत्यादि ननु चानुबंधाभावे कथमदादिकाः संज्ञा उपपद्यन्ते आदिरन्त्येनेत्यत्र आदिः कलैः सहेत्युक्तौ अइ
उण् इत्यादिकाः संज्ञाः करिष्यन्ते स्वरसंधिभ्रमासंदेहापनकरिष्यन्त इत्यदोषः ञ्यमिति यथाभूतागर्गादिभ्यो अकाराद

15

लिङ्गार्थानुप्रत्यापत्तिः लिङ्गार्थासात्तर्हि भवति तत्तर्हि वक्तव्यं यद्यप्येतदुच्यते अप्यवेतर्हि अनेकमनुबं
धयानं नो चार्थं इत्संज्ञा वक्तव्या लोपश्च न वक्तव्यः यदनुबंधैः क्रियते तत्कत्वादिभिः करिष्यते
॥१५॥ सिध्यत्येवं अपाणिनीयं तु भवति यथान्यासमेवास्तु ननु चोक्तं आकृत्युपदेशात्सिद्धमिति चेत्संवृता
दीनां प्रतिषेध इति परिहृतमेतत् गर्गादिविदादिपाठात् संवृतादीनां निवृत्तिर्भविष्यति ननु चान्य ॥१५॥
त्र गर्गादिविदादिपाठे प्रयोजनमुक्तं किं समुदायानां साधुत्वं यथा स्यादिति एवं तर्हि अयमनेन क्रिय
ते पाठश्चैव विशिष्यते कलादयश्च निवर्त्यन्ते कथं पुनरेकेन यत्नेनोभयं लभ्यमित्याह द्विगतास्त्र
पि हेतवो भवन्ति तद्यथा आम्राश्च सिक्ताः पितरश्च प्रीणिता इति तथा वाक्यान्यपि द्विष्ठानि
भवन्ति श्वेतो धावति अलंबुसानां यातेति ॰ ॰
यत्तथाभूतास्वसर्वत्र प्रयोक्तव्या इति प्रतिपादनमित्यर्थः द्विगता इति द्वावर्थौ गताः प्रयोजनद्वयस्य संपादक इत्य
र्थः तथा था स्यादिति शाब्दस्यार्थवत् द्विगतत्वमित्यर्थः ॥

आकृत्युपदेशादिति उपात्तोपि विशेषो नान्तरीयकत्वाज्जाति प्राधान्यविवक्षायां न विवक्षित इत्यर्थः संवृतादीनामिति एकारादीनां संवृतत्वदोषो नत्वकारस्य संवृतगुणत्वात् तत्र संध्यक्षरेषु विवृततमेष्वप्यर्थेषु संवृतत्वं दोषः कलः स्थानेतरनिष्पन्नः का कलिकृत्वेन प्रसिद्धः ध्मातः श्वासभूयिष्ठतया ह्रस्वोपि दीर्घ इव लक्ष्यते एणीकृतो विशिष्टः किमयं ओकारः अथौकार इति सन्देहः अंबूकृतो व्यक्तोप्यन्तर्मुखमिव श्रूयते अर्द्धकोदीर्णोपि ग्रस्तः ग्रस्तो जिह्वामूलेनिगृहीतः अव्यक्तइत्यपरे निरस्तो निष्ठुरः प्रगीतः सामवदुच्चरितः उपगीतः समीपवर्णान्तरेगीत्यानुरक्तः क्ष्विण्णः कंपयानइवारोमशोगंभीरः अथ

आकृत्युपदेशात्सिद्धं अवर्णाकृतिरुपदिष्टा सा सर्वमवर्णकुलं ग्रहीष्यति तथेवर्णाकृतिस्तथो वर्णाकृतिः आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधः आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधो वक्तव्यः के पुनः संवृतादयः संवृतः कलो ध्मातः एणीकृतोंबूकृतोर्द्धको ग्रस्तो निरस्तः प्रगीत उपगीतः क्ष्विण्णो रोमश इति अपर आह ग्रस्तं निरस्तमवलम्बितं निर्हतमंबूकृतं ध्मातमथो विकम्पितं संदष्टमेणीकृतमर्द्धकं द्रुतं विकीर्णमेताः स्वरदोषभावनाः इति अतोन्ये व्यंजनदोषाः नैषदोषः गर्गादिबिदादिपाठात् संवृतादीनां निवृत्तिर्भविष्यति अस्त्यन्यद्गर्गादिपाठेप्रयोजनं किं समुदायानां साधुत्वं यथा स्यादि ति एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि सा तर्हि वक्तव्या ० ००

अंबिनो वर्णान्तरप्रमिलः निर्हतो रुक्षः संदष्टो वर्द्धित इव विकीर्णो वर्णान्तरे प्रसृतः एकोपनेकनिर्भासीत्यपरे स्वरदोषभावना इति स्वरदोषगोत्राणि अनन्तादिदोषा अप्रमत्तिप्रमादकृताः अस्त्यन्यदिति गर्गइत्यादिनेवर्णं निवेशेन गर्गादीनां साधुत्वं यथा स्यात् गार्ग्यइत्यादीनां माभूत् तत्र च्युत एतामेयाकारादीनां दोषनिवृत्तिः कृता स्यात् ननु समुदायान्तरस्थानां पर्यायिन्यपि ... नवाद्याद्यः ... साधुत्वापायि भवति निवृत्तकलादिकामिति अकारस्य संवृतत्वा

फ० १९८

अथ चेत्ति केवलानां वर्णानां लोके प्रयोगाभावाद्धात्वादीनां चाप्युद्भात्वाभावात्तथात्वाद्वर्णानां न कश्चिद्दोषः यानि

16 अथवा इदं तावदयं प्रष्टव्यः क्वेमे संवृतादयः श्रूयेरन्निति आगमेषु आगमाः शुद्धाः पठ्यन्ते
प्रत्ययेषु तर्हि प्रत्ययाः शुद्धाः पठ्यन्ते धातुषु तर्हि धातवोपि शुद्धाः पठ्यन्ते प्रातिपदिकेषु प्रा
तिपदिकान्यपि शुद्धानि पठ्यन्ते यानि तर्हि अग्रहणानि प्रातिपदिकानि एतेषामपि स्व
॥१९८॥ रवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्तव्यः शशः षष इति माभूत् पलाशः पलाष इति ॥१६॥
माभूत् मञ्चको मंजक इति माभूत् आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः
उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः ०० इति श्रीभगवत्पतञ्जलिविरचिते
महाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे प्रथमान्हिकम् ० ० ०

न्यन्ति डित्थादीनि एतेषामपीति शिष्टप्रयुक्तत्वेनोणादीनां पृषोदरादीनां च साधुत्वाभ्यनुज्ञानात्स
मत्र संग्रहः सिद्ध इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे प्रथमे पादे प्रथमान्हिकम् १०

बा।

17